# U.G. 1st Semester Examination - 2025
# SANSKRIT
## [MAJOR]
## Course Code : SANS-MJ-T-01
## [NEP-2020]

Full Marks : 60 Time : $2\frac{1}{2}$ Hours

*The figures in the right-hand margin indicate marks. Candidates are required to give their answers in their own words as far as practicable.*

1. यथेच्छं **दशानां** प्रश्नानामुत्तराणि सरलसुरगिरा देवनागरीलिपिञ्चाश्रित्य प्रदेयानि: $2\times10=20$

क) 'रघुवंशम्' कस्य कृतिरस्ति? अस्मिन् महाकाव्ये कति सर्गाः समुपलभ्यन्ते?

ख) ''राजेन्दुरिन्दुः क्षीरनिधाविव'' — क आसीत् 'राजेन्दुः'? 'क्षीरनिधाविव' पदस्य सन्धिविच्छेदः कार्यः।

ग) राजा दिलीपः कस्मात् कारणात् प्रजाभ्यो वलिम् अग्रहीत्? इदं कर्म केन सह तुलितमस्ति?

घ) राज्ञो दिलीपस्य पत्नी कस्मिन् वंशे सम्भूता आसीत्? सपत्नी राजा दिलीपः पुत्रकाम्यया कुत्र जगाम?

ङ) ''धुर्यान् विश्रामय'' — कः कदा कं प्रति आदेशमिमं चकार?

च) राज्ञो वशिष्ठस्य पत्नी का आसीत्? सपत्नीवशिष्ठं पश्यन् दिलीपः किमनुभूतवान्?

छ) ''इक्ष्वा कूणां दुरापेऽर्थे त्वदधीना हि सिद्धयः'' — वचनस्य सारो लेख्यः।

[Turn over]

ञ) युधिष्ठिरं प्रति दुर्योधनवार्तप्रेषणावसरे वनेचरस्य वाग्भङ्गी कीदृशी आसीत्?

झ) ''तथापि जिह्म: स भवज्जिगीषया'' — 'जिह्म'-पदस्य कोऽर्थ:? 'स'-पदेन को बोध्य:?

ञ) दुर्योधन: कथं सामदाननीतिं प्रयुक्तवान्?

ट) परराज्यनीतिविषये दुर्योधनस्य उद्योग: कथमासीत्?

ठ) ''विचित्ररूपा: खलु चित्रवृत्तय:'' — पादस्य तात्पर्यार्थो लेख्य:।

ड) ''विहाय शान्तिं नृप! धाम तत् पुन:'' — कस्य उक्ति:? उक्तिरियं किमर्थम्?

ढ) वनेचरमतेन कस्तावत् किंसखा कश्च किम्प्रभु:?

2. यथेच्छं **चतुर्णां** प्रश्नानामुत्तराणि संस्कृतभाषयां वङ्गभाषायाम् आङ्गलभाषायां वा लेख्यानि : 5×4=20

क) यस्य कस्यचि**देकस्य** श्लोकस्य बङ्गानुवाद: आङ्गलानुवाद: वा क्रियताम्-

i) तं वेधा विदधे नूनं महाभूतसमाधिना।
तथाहि सर्वे तस्यासन् परार्थैकफला गुणा:।।

ii) तस्यामात्मानुरूपायामात्मजन्मसमुत्सुक:।
विलम्बितफलै: कालं स निनाय मनोरथै:।।

ख) संक्षिप्तात्मिका टीका रचनीया (**द्वयस्य**) : $2\frac{1}{2}+2\frac{1}{2}$

i) सुरभि:

ii) वशिष्ठाश्रमस्य शोभा

iii) अरिषड्वर्ग:

iv) चारचक्षुष:



ग) यस्य कस्यचि**देकस्य** श्लोकस्य वङ्गानुवाद आङ्गलानुवादो वा करणीय:

i) सुखेन लभ्या दधत: कृषीवलैरकृष्टपच्या इव शस्यसम्पद:।
वितन्वति क्षेममदेवमातृकाश्चिराय तस्मिन् कुरवश्चकासति।।

ii) व्रजन्ति ते मूढधिय: पराभवं भवन्ति मायाविषु ये न मायिन:।
प्रविश्य हि घ्नन्ति शठास्तथाविधान् असंवृताङ्गान् निशिता इवेषव:।।

घ) यथामति भावार्थ प्रकाशय (**एकस्य**):

i) हेम्न: संलक्ष्यने ह्यग्नौ विशुद्धि:श्यामिकापि वा।

ii) हितं मनोहारि च दूर्लभंक्च:।।

ङ) संक्षिप्तात्मिकां टीकां लिखतु (**एकस्य**) :

i) अश्वघोष: ii) माघ:

च) संक्षिप्तात्मिकां टीकां लिखतु (**एकस्य**) :

i) रघुवंशम् ii) रावणवधम्

3. **द्वयो:** प्रश्नयोरुत्तराणि संस्कृतभाषया वङ्गभाषया आङ्गलभाषया वा प्रदेयानि: 10×2=20

क) दिलीपस्य पुत्रोत्पत्ते: प्रतिबन्धक: क:? अभिलाषसिद्धये वशिष्ठ: दिलीपं किमुपदिष्टवान् – रघुवंशस्य प्रथमसर्गानुसारत: तदालोचय।

ख) ''नारिकेलफलसम्मितं वच: भारवे: सपदि तद्विभज्यते।'' — किरातार्जुनीयस्य प्रथमसर्गमनुसृत्य वचनस्य सार्थकता प्रतिपाद्यताम्।

ग) उत्सस्थलनिर्देशपुर:सरं यस्य कस्यचि**देकस्य** श्लोकस्य संस्कृतभाषया सप्रसंङ्गव्याख्या कार्या।

i) ज्ञाने मौनं क्षमा शक्तौ त्यागे श्लाघाविपर्यय:।
गुणा गुणानुबन्धित्वात्तस्य सप्रसवा इव।।

ii) अबन्धकोपस्य विहन्तुरापदां भवन्ति वश्याः स्वयमेव देहिनः।
अमर्षशून्येन जनस्य जन्तुना न जातहार्देन न विद्विषादरः।।

घ) प्राचीनसंस्कृतमहाकाव्यस्य इतिहासे श्रीहर्षस्य साहित्यकीर्तिमाश्रित्य कश्चन प्रबन्धो लेख्यः।